लनापरिस्पंदजातिमात्राश्रियरूपेणस्थिताः। स्ववाचकशब्दैर्योग्यान्विताः अभिधीयंते यदा तदा धात्वर्थः शाब्दस्यानवगतसंगतिप्रसं
त्तिपादनविरोधात्वान्न नियोगाधीना प्रवृत्तिरित्यर्थः। आकस्मिकीत द्विप्रवृत्तिः स्यादित्यादावप्रबुद्ध इति। न शब्दः प्रवर्त्तकोऽनियो
गात्तागएव प्रवर्त्तक इत्यर्थः। कृतिसाध्यत्वं नियोगस्य नास्तीति यदुक्तं तत्साधयति। साधनेति। यागादिसाधनं। प्रयाजादीति कर्त्त
व्यं स्वर्गादिफलमनंतरं व्यतिरिक्तं कः प्रेरकत्वात्साधायता। फलबाह्यत्वं स्पष्टयति। पुरुषार्थादिति। इष्टानिष्टप्राप्तिपरिहारव्यतिरिक्त
इत्यर्थः। किंपरेण नियोगः। प्रयत्नो। क्रिया वा। फलं वा। अन्यद्वा। कालत्रयासंस्पृष्टत्वेन वाच्यो वा। नीरूपो वा। कापीति विकल्प
यति। किंचेति। आद्यं दूषयति। नेति। प्रवर्त्तकविषयशब्दव्यापारस्यावरणेवान्न प्रवृत्तिहेतुकार्यत्वमित्यर्थः। द्वितीयं दूषयति। नं
तरापीति। लिङादिश्रवणानंतरं स्वस्थावस्थाताः प्रत्यक्षतिरूपप्रयत्नस्य मानसप्रत्यक्षत्वादपूर्वकार्यत्वानुपपत्तिरित्यर्थः। तृतीयं निर
स्यति। नेति। क्रियायाः कर्त्रन्वयित्वात्। नियोगस्य नियोज्यान्वयित्वादित्यर्थः। तुरीयं निराकरोति फलमिति। सुखदुःखप्राप्तिपरिहा
रादन्यत्वादित्यर्थः। पंचमं परावष्टांकोऽरकमिति। नियोगस्यासिद्धत्वात्सिद्धस्यैवकारकत्वादित्यर्थः। षष्ठं विघटयति। नापीति। माना

कारकं वप

वि०

त्वादित्यर्थः॥ सन्नमनिरस्यति। नवेति। देवमाद्दा घटेति। घट इत्यर्थः कालत्रयस्यास्पृष्टो घाटतानाति। इतरथा घटोत्पत्त्यादौ न
डाद्यर्थस्य द्विरन्निष्मनव संगादतो घटकार्यतामात्रत्वज्ञातिरूद्याद्विरितित्नाव। श्रंग्रं व्यातयति। नियोगापीति। व्यापाराति र
क्तस्य इष्टिनत्वास्पाराराश्याविनियोज्यव्यापारः सइति शरीरत्वेष्टा नरवत्स्यद्व्यचमित्यर्थः। एवं नियोगस्वरूपं निराकृत्य तत्कृत्यनि
कारणतात्वेन निराकरोति सिद्धेष्विति। अनुष्ठिता धात्वर्थोनियोगसाधक इति शेषः कृतसिद्धिरिति। कालत्रयास्पृष्टोऽनाराध्य
त्वाद्वो नियोगो न कर्मसाध्य इति दूषयति। नेति। आप्युत्पत्ति विकारसंस्कारा न नियोगस्य कर्मसाध्याः तस्यानारो
प्यस्वभावत्वात्ऽनाधेयातिशयत्वेन स्वीकारादित्यर्थः। एवं नियोगस्यासिद्धिं स्वरूपं च निरास्य अपूर्वादिसाधकत्वं निराकर्तुमुपक्र
मते। कार्यस्यतः सिद्धिं स्वर्गादिसाधकं। किंवा तत्स्वरूपव्यापारत्वस्वरूपं। आद्यं दूषयति। कार्यमिति स्वस्वरूपेण सिद्धं रनन्यापेक्ष
त्वेन सदेकरूपत्वादित्यर्थः॥ द्वितीयमनुवदति। क्रियाव्यापारेति। दूषयति। नस्येति। कालत्रयेपि तस्य विनाशाभावात् तत्तद्व्यापा
रादसिद्धेन कदाचन फलं स्यादित्यर्थः॥ नियोगस्य निर्विशेषत्वात नियमसत्त्वासत्त्वायारन्यतरस्वीकारजन्मासंभवं व्यतिरेकं
दृष्टांतेनाह। संतापमानेति। यागस्तावद् नियोगि न इति यावत्तसंपत्ति साधकं तद्दृष्टांतमाह। द्योमेति। यागादरपिन कार्य
स्वरूपं यागः कर्तव्यादानं कर्तव्यमिति न तात्तदप्रतीतेरेताहृचीमेव कार्यमित्याशंक्याह। कर्तव्य इति। कार्यं कर्तव्य
मिति तत्रैव नमात् कर्तव्यतायां नियोगत्वात्तत्वपि तद्धर्मत्वमस्तीत्याशंक्याह। कार्यकर्तव्यातेति। नयोग्याभ्यागिवतितरकानवस्था
द्वत्यर्थः। यदि कार्यं कर्तव्यतायाः कार्यतानेष्यते तत्राह। तस्मादिति। यत्र कर्तव्यता नास्ति तदकार्यमेवाकाशवदिति। यागः क
र्तव्यत्वं कर्तव्यमिति। शशशृंगगगनकुसुममिति वक्ष्यमाणहेदिकल्पमात्रमित्यर्थः॥ तस्मान्न नियोगस्य साधनं विविक्ताशेष

तराःकार्यमिति स्वमतमुपसंहरति। अन्त इति। नान्यत्पृथगिति। अर्थोद्यात्तावात पृथक्कुगुणवद्देइयर्थः। यागजन्यस्वर्गसाधक-
नियामप्रमाणेन वाच्यं तदसिद्धिरित्याह। लिङादिरिति। प्रेरणा ग्राह्त्तावनात त्वप्रमाणे लिङादिनतियागइत्यर्थः। प्रेरणात्वं तु तत्त्वेनावये-
तीकापि विषयप्रवृत्तेः एषप्रवर्तयतीति विषयत्वेन नियोगान्वयो नाह। विषयत्वानतीति। भावनायालिङाद्यर्थत्वे सिद्धे न विरोधेन वादाप्रे-
रणापीति। अंगीकारमात्रेणोक्तमित्यर्थः। कृत एतदत आह। समस्तेति। साधनादित्रयाह। ह्यमित्यादिप्रसंगादेवं तरमाह। मित्यत्तावतइति।
आक्षव्यापाराद्विनाक्षतावनानवनाक्षपरिस्पंदः परिणामो वास्ति। अमूर्तत्वात्विभुत्वात्। नापिप्रयत्नः। अचेतनत्वादित्यर्थः। किंवालिङर्थस्य ९८:५
पं वा प्रेरणा शक्तिर्वा शक्तिव्यापारो वा प्रेरक पुरुषव्यापारो वा न प्रथम इत्याह। नेति। लिङादेर्जीवना वाचकत्वात् यद्यपि तद्रूप इत्यादिभ्यं वा लिङा-
दीनां रूपसंपदपि भावनायाएकरूपत्वात् इत्यर्थः। द्वितीयं दूषयति। शक्तेरिति। प्रेरणायाः लिङादिवाच्यत्वोपगमाच्छक्तिशक्तिमतोरभेदाह अत्रा-
वाचकत्वात् संभवादिति। तावत्तृतीयं निरस्यति। नेति। अत्र मंगीकारणादित्यर्थः। चरमं परा चाह। प्रेरकेति। कथं तर्हि लिङादेर्विधित्वमत आ-
आह। अन्त इति। समीहितेति। भावनाया अभिवदस्याज्ञातज्ञापकत्वे प्रामाण्येपि प्रमाणेनास्या वेदस्यत्वादातथात्वेति। ववदेः बुद्धबोधक १९
त्वेन तव प्रमाणं प्रमाणत्वात्प्रत्यक्षादिवदित्यर्थः। यागादेरिष्टसाधनत्वं लिङाद्यर्थ इत्यतक्रियानंतरं स्नानादिवत्फलस्यात तदनुपलंभात्। ३
अदृष्टादवलिङादिवाच्यमत आह। निष्ठादिति। यथायुरुमतेयागानुष्ठानादुत्पादितनियोगस्यकामादिवाकोपि माणपातफले
नियतं तथागस्तुतयागस्यापि वेदप्रामाण्यादेव फलमीश्वरप्रसादादिद्वारकं नियतमित्यर्थः। तियोगस्य क्रियात्मनोनंतरफले वा
सः तु पि यागादेः क्रियात्वान्महेदनवनंतरफले नत्तवितत्वेतददर्शनात्स्वन्यस्ता दिविसंवादागमस्याप्रामाण्यमत आह। विसंवादापी-
ति। उपायत्वस्यावद मितत्वादित्यर्थः। धात्वर्थे इति साधनत्वबोधकत्व वेदप्रामाण्यस्येवादिष्टत्वाद्वेदकत्वादितिर्ककि यत्तु यत्तः त्वादः॥

नानंतरति। अत्र यागशब्देन क्रियोच्यते तस्याः प्रक्रियाऽनंतरफलानियमेन न दृष्टसंवादोऽस्ति चारादित्यर्थः। फलिनमा
दात्रतइति साध्यसाधनसंबंधबाधकपरं लिङादिपदं न नियोगबोधमित्युक्तं तत्र संबंधस्य कालत्रयसंबंधदासीदस्तिनव
त्स्यतीति प्रत्ययायानावतत्राह। स्वसामर्थ्यादिति। हितसाधनत्वस्य लिङाद्यर्थत्वेप्युक्तं नरमादासाद्यादिति। यागस्वर्गयोरव्यव
हितसंबंधसिद्धिर्नियोगस्य लिङाद्यर्थत्वे तेन यागस्वर्गयोर्व्यवधानरूपविलंबनास्यात सानघुक्तागौरवादित्यर्थः। अरुण
दिगुणानां द्रव्यव्यवधानेन क्रियत्वावनायां संबंधवद्यागसंबंधवद्यागस्वर्गयोरपि नियोगव्यवहितसंबंधः किं न स्यादि
त्याह। साक्षादसतीति। अव्यवधानसंबंधस्तावत्परंपर्यंन त्वसति तत्र पारंपर्यस्वर्गकामो यजेतेत्यत्र न युक्तवत्रक्षणा दा (विव६
इत्यर्थः। व्यतिरेकदृष्टांतं स्पष्टयति। श्रुत्येति। अरुणया क्रीणातीति श्रुत्या अरुणो गुणः क्रियायां विनियुक्तोऽपि प
शुद्रव्यविभाग्येव सामक्रयस्य साधकं गुणस्यास्वतंत्रत्वात् अन्यथा केवलस्य गुणस्य साधकत्वे योगादृष्टस्यादित्य
र्थः। क्षणिकस्य कर्मणः कालांतरीयफलसाधनत्वसिद्धाय मध्यवर्ति किमपि व्यापि स्वीकार्यमितो नियोग एव किं न स्या
दित्याह। याग इति। स्वर्गादिफलमनुत्पाद्य नियोगं न साधयति। स्वर्गादरदृष्टत्वात् अनुष्ठितोऽपि न यागः स्वर्गनियोगयोः
साधकः स्यादित्यर्थः। फलमनुत्पाद्येव व्यापारांतरेण यागो नियोगं साधयेदिति चोद्य। नत्विति। क्षणिकस्य कर्मणो विरघ्य
स्थापारत्यागात् फलजनकव्यापारेणैव नियोगजनकत्वमिष्यते। फलं च न दृश्यते अतः स्वर्गस्य साधकत्वान्न कार्येण प्रिया
गः साधकत्वेन संबध्यत इत्यर्थः। यागो नं तामवस्वर्गादिफलमदृष्टरूपमारस्तते स्वर्गकामादिवाक्यप्रामाण्यमिति शंकते। आश्र   दि २
यते। समाधिसाध्यमाह। नामतो। आततानानेनरफलादर्शमाद्विसंवादाशंकेत्यर्थः। एवं सामग्रीमापाद्य स्वपक्षे विशेषमाह। आम   ४८

मत्वास्त्वेति। आनंतर्यानियमान्मम कालांतरेपि फलं स्यात् तान्नत्रुस्वर्गसुखाद्येव यागापूर्वं साधयदिति तदलाबादसाधकं
साधमदीनमपूर्वं स्यादित्यर्थः। नियोगस्य धात्वर्थसाध्यत्वेपि किमेक एव नियोगो यागदानादिसाध्यः किं वा प्रतिधात्वर्थमन्यो बंधत्तदा त्त
त्तदा प्रथमे प्रत्याह। कार्येति। द्वितीयमनुवदति। अन्तु बंधेनेति नियोगभेदादिति विशेषात् दूषयति। नन्वेवं ति यतो नियोगभेदस्तत एव
फलं स्यादिति नियोगाद्वय्यर्थः। भेदस्योपाधिकत्वमनिष्टं नरमाद्दोपाधिकत्वेति। उपहितस्य स्फटिकलौहित्यवन्मिथ्यात्वान्मिथ्या
नियोगसाध्यः स्वर्गादिरपि मिथ्यैव स्यादित्यर्थः। पूर्वोत्तरवादयोः स्वयमेव दूषणानुवादपूर्वकं संबंधमाह। एवमिति। आत्मा द्रष्टव्य इति
किमात्मनि विधेस्तद्दर्शने वा नाद्य इत्याह। प्रतिपत्तीति। विषयप्रतिपत्तिशाद्धे नलस्यात्। विधेः क्रियाविषयित्वादित्यर्थः। अनुपपत्तिं प
स्फारयति। सिद्ध इति। आकाशवन्नित्यसात्त्वस्य वस्तुष्ववन्नियामस्यापि न विधिरित्यर्थः। द्वितीयं दूषयति। न चेति। विधिरिति। ब्रह्मज्ञानस्यापि विधे
यत्वेनागृहीविशेषणाविशेष्यबुद्धिरिति न्यायात् ब्रह्मप्रतिपत्त्युपनयामवंचब्रह्मज्ञानमुत्पन्नविधिर्विधिनस्मदुस्यात्तिरितिइन
८६ एतन्नाश्रयादित्यर्थः। वस्तुनो विधेयत्वं न संभवतीति यदुक्तं तदपि स्फुटं रूपापादि विधेयत्वेन समर्प्यमाणत्वाद्ब्रह्मदाद्दीनत्वति। प्रकृतिद्रव्यस्य
सिद्धत्वेपि रूपाकारस्यासिद्धत्वादेकान्यस्य उक्तदोषनित्यत्वाद्रूपांतररहितत्वादित्यर्थः। स्वतःसिद्धस्यापि विधिविशेषत्वेन समर्प्यते
बाधकमाह। असिद्धत्वादिति। प्रतिसिद्धं दर्शनमिति सिद्धोस्मत्व॰ स्फुट इत्यर्थः। विधिपरवाक्यान्निष्ठो कथं चमतसिद्धिरत्याह। तन्निष्ठत्व
ति। उपक्रमादिलिंगादित्यर्थः। ज्ञाननियोगशेषत्वेन वस्तुनः समर्पणे कथं तन्निष्ठत्वमत्याह। द्वार्येति। विधिविकलवाक्यस्याबो
धकत्वाद्विधिपदं वस्तुबाधकत्वसिद्धार्थमध्याहार्यमतो निर्बाधवेद्यार्थत्वमत्याह। सर्वमिति। किंच। विधिरपि ज्ञानोपदेश इत्यर्थः। सुत्व
न्नुभन्नियमफलसाध्यं वा। नान्यथार्थं वा। फलार्थं वा। ब्रह्मणः स्वरूपार्थं वा। पदार्थसंसर्गार्थं वा। नाद्य इत्याह। आत्मेति। वाक्या

दवोत्पत्तिरित्यर्थः। अत्र दूषणांतमाह। यागादीति। यागकर्त्तव्यताज्ञानमेतद्वाक्यव्यतिरेकेण न विध्यंतरमीक्षते। विधिज्ञानस्य
विध्यंतरापेक्षत्वेनानवस्थानात्। नापीमं विधिं यागकर्त्तव्यता पा[र]ंवादस्यात् तस्माद्वाक्यादेव कर्त्तव्यताज्ञानं। एवं ब्रूसज्ञानम
पीत्यर्थः। इतश्च न ज्ञानान्यत्वं त्ये विधिरित्याह। प्रतिपत्त्रिति। प्रवृत्ते प्रागेव विधेयमवगम्य प्रवृत्तिर्विधिफलं विधिना प्रवृत्त
स्य विधिविषयज्ञानाभावमतिरिति परस्पराश्रय इत्यर्थः। पूर्वमुत्पन्नावितरेतराश्रयत्वमुक्तं इदानीं प्रतीतावितिभेदः। उत्प
न्नेनाज्ञातविधिरनुत्पन्नत्वान्नाद्य इत्याह। बाधेऽस्मिन्निति। अनंतर इत्याह। अनुत्पन्ने वेति। तरवृत्थमाह। प्रवृत्तेरिति। प्रवृत्तिदे
तोऽर्हीन स्यात्तावादित्यर्थः। द्वितीयमनुवदति। आस्यति। दूषयंतुं विकल्पयति। स इति। प्रथमं प्रत्याह। प्राक्षादिति। विधिवेद्य
र्थत्वमेवापन्नमित्यर्थः। द्वितीयं दूषयति। अन्यस्मिन्निति। मानांतरापेक्षत्वाद्वेदस्य स्वतःप्रामाण्यहानिरित्यर्थः। विधिबलाद
र्थपरत्वं त्वाख्यास्यति तृतीयं शंकते। विवक्षितेति। पदानामन्विताभिधानपरत्वं विधिरुक्तं वाक्यस्य वा नाद्य इत्याह। नवमिति। लोकवे
दाधिकरणन्यायेन ज्ञानानामर्थबोधकत्वं स्वारसिकमित्यर्थः। द्वितीयं दूषयति। अविशिष्टेति। अविशिष्टेषु वाक्यार्थ इत्या
दिना वाक्यमात्रस्य स्वार्थपरत्वं सामर्थ्यात्प्राप्तं स्वारसिकमित्यर्थः। न्नेतमित्यत आह चान्नविधिरुक्तमित्यर्थः। किंचाविधिमात्रपे
बलादर्थपरत्वं। अध्ययनविधिव्यतिरिक्तविधिबलाद्वा प्रथमे प्रत्याह। पीति। दृष्टार्थता अर्थधीफलतेत्यर्थः। द्वितीयमपव
दति। विधिरिति। न स्यापि विदितार्थत्वार्थं विध्यंतरस्वीकारे तस्यापि तस्याप्येवमनवस्थानात् स्वार्थपरत्वासिद्धौ वादाद्यविव
क्षितार्थः स्यादित्यर्थः। निगमयति। तदेवेति। न वमुसर्ग्रतां यस्मादित्युक्तन्यायेन विधिर्न कल्प्यत इत्यर्थः। तृतीयमनुपठम
ति। विधिमंतरेणाविवक्षितफलं ज्ञानं स्यादित्यर्थः। ज्ञानस्य वाक्याद्व्यतिरिक्तं फलं कर्मेताडवकालांतरप्राप्यं तत्र ब्रज्ञानेव

मतमिति

स्वा

४५

सिद्धमिति दूषयति। नेयेति। केषांचिन्नद्धानामर्थज्ञाकद्यमात्मगतमिति मतं तत्राप्याह। यद्यपीति। दृष्टमाद्यामारमानेति। मानफल॥
स्यानुत्तवस्य मात्रमानामयकर्त्तृक्रियादिसाधकत्वेन स्वतंत्रएवानावादित्यर्थः। परममनुक्रामति। अथापीति। उक्तप्रकारवदुष्टयासंत
त्वपि ज्ञाननियोगगामीकार्योऽन्यथा केवलसिद्धस्य मानांतरगोचरत्वात्तन्निष्ठ वयमोनुवादत्वं स्यादित्यर्थः। नियोगगामीकारेऽपि सिद्धस्य मा
नांतरयोग्यत्वादुक्तदोषता दृवस्थामत्राह। विधेयार्थेति। नियोगस्य मांतरगोचरत्वात्तत्संसृष्टत्वेन ब्रह्मणोपि अपूर्ववल्लांतरइत्यर्थः॥
अनात्मत्वं मांतरायोग्यत्वं च प्रयोजकं न सिद्धत्वमिति संक्षयद्दूषयति। वस्त्विति। स्यत्तावद्या मायोगादत्यथा सिद्धसंबंधन्नियोग
स्य मांतरगत्यत्वं स्यादित्यर्थः। सिद्धार्थवचसोनुवादत्वं विकल्प्य तिदूषयितुं। किमिति। विद्यमानबोधकं अनुवादकं मानांतरावग
ताबाधकं वेत्यर्थः। प्रथमं परा करोति। तत्रेति। एतदुपपादयति। मानांतरेति। अनवगतपरिनिष्पन्नवस्तुगोचरप्रत्यक्षादेरिव
वचसोपि प्रामाण्यमविरुद्धमिति। नाद्यः। वस्तुपरिछेदमात्रेण प्रामाण्यमिनरप्रामाण्यवद्वाक्यस्यन युक्तं वस्तुमर्थपर्यवसानस्यायु
क्तत्वादत्राह। वस्तुमर्थश्चेति। वस्तुस्वसंविद्रूपत्वादात्मनइत्यर्थः। वस्तुमात्रपरत्वेदोत वाक्यमनुवादकं सिद्धमात्रबोधकवाक्यत्वात्समरि
तीरादिवाक्यवदत्राह। उक्तेति। पुरुषवलीतवाक्यवस्तुपाधिरित्यर्थः। ब्रह्ममांतरगम्यं सिद्धत्वाद्घटवदित्यनुमानान्मांतरसापेक्ष
त्वमित्यत्राह। नवेति। अन्यथा नियोगस्यापि पक्षयचनलौकिकमानगम्यत्वप्रसंगादित्यर्थः। शंकामंगीकृत्याप्याह। वाक्यमानस्ये
ति। तदापेक्षयात्राह। एवं किमित्यप्रमाणं शास्त्रापेक्षया मानांतरमेवाप्रमाणं किं न स्यादित्यर्थः। सापेक्षत्वमंगीकृत्योक्तं इदानीं मानां
तरापेक्षमानमित्युक्तं तदप्ययुक्तं इत्याह। नापेक्षते। तदुक्तमाह। मानांतरेति। विद्यमानावेदकत्वेदस्य प्रामाण्यमेव नास्तीत्यत्राह। मानांत
रेति। अज्ञातार्थबोधकत्वादिकं मानमेव अनवगतावगंतृत्वं प्रमानलक्षणत्वादित्यर्थः। द्वितीयमनुवदति। अथेति। मानांतरापेक्ष
मनुवादकंमयावबोधकंत्वमित्युक्तापकमित्यर्थः। आह्वतदितरमानयोरकस्यावस्तुबोधनक्रियायां अपेक्षत्वादनपेक्षत्वं तुल्यमिति परिह

तिः द्वयोरिति। पूर्वं प्रमाणगृहीतज्ञापकाः शब्दो मानान्तरानवगतगोचरं पूर्वपदस्थ प्रमाणमिति गोचरसेदादेकक्रियात्वेऽपि सिद्ध इति शं
कते। अथेति। अनधिगतत्वस्य दुरधिगमत्वादृवतीनार्थविसाग इति प्रतिपादनाय विकल्पयति। मानइति। मानव्यापारात्प्राग
ज्ञातत्वं मानसिद्धं स्वयंप्रकाशो वा अनुत्तवगम्यं वेत्यर्थः। ज्ञातत्वसाधकमेव ज्ञातत्वसाधकं किमत्र दृष्टान्ते अत्राद्य ज्ञाततयाऽर्थे
ति। न तावत् स्वप्रकाशमपसिद्धान्तात्। नाप्यमानगम्यं मिथ्यात्वात्। ज्ञानत्वस्येति। प्रसिद्धिरिति तदस्य पराहतत्वादित्यर्थः। अज्ञानत्वं न नि
वर्त्तकज्ञातीयप्रकाश्यं निवर्त्तत्वात्तमोवाद्विपक्षे बाधकमाह। मानेति। अज्ञानत्वस्य वा स्वस्य निवृत्त्ययोगात् रूपादिकमप्य
ज्ञातमेवेति व्यवहारलोप इत्यर्थः। प्रामाणिकस्य तमादरिवाक्यो ज्ञानस्यापि निवृत्तिः स्यात् तत्राह। न तथेति। संज्ञायादस्य
प्रकाशत्वसाक्षित्वं च बाधाय तर्कगीकारान्मानसिद्धस्य न निवृत्तिरित्यर्थः। अज्ञाननिवृत्तिमन्तरेणापि मानानां मानतास्यादि
ज्ञातार्थलाभादिति शंकते। अज्ञानत्वेति। दूषयति। ज्ञानस्येति। प्रमाणमज्ञातपदवृत्तं तत्त्वात् नेति। यंशयमदेवं उद्देयं थादवय
वापमाणम एवमज्ञातादन्यमिन् ज्ञातपदवृत्तः शक्तस्त्रातिशयम उक्तीनत्व प्रमाणं किं नस्यादित्यर्थः। मानान्तरावगम न ब्रह्म
गोचरवाक्यप्रामाण्यात्तावेकारणमाहाऽपि एकार्थ्येति। अव्याप्त्याद्दूषयति। तथात्वेति। प्रसंगबीजमाह। एकस्यामिति। प्रस
गांतरमाह। व्याप्त इति। मापदाप्रमाणातिशेषः। फलमाह। प्रमाद इति। एवं मानान्तरागोचरवाक्यप्रमाणमित्युक्तं इदानीं
नियोगस्यालौकिकत्वात्तद्रूपगामब्रह्मणोपि अलौकिकत्वमित्युक्तं दूषयति। नियोग इति। नियोगत्वमलौकिकप्रयोज
कं। वैदिकनियोगत्वं वा। आद्ये विरचनकामा दरीतकीं भक्षीयादित्यादिवाक्यमनपेक्ष्यं स्यादित्यर्थः। द्वितीयमुत्थापयति। नै
ष इति। लौकिकवाक्याद्वक्तृज्ञानावगतसाध्यसाधनसंबंधधीरव जायते न नियोगधीरिति। सापेक्षो चोत्तवदत्र नियोगधीरि
त्यनुपपन्नत्वमित्यर्थः। प्राज्ञा प्राप्त विवाक्ये न पौरुषेयत्वे सापेक्षत्वप्रायाङ्कनं सिद्धनिष्ठत्वमिति परिहरति। नेवमिति।

दृष्टीनक्यादिवाक्यस्य नियोगविषयत्वाभावोऽपि पेरुत्वं न पौरुषेयत्वेनेति परः। प्राग्युक्तं स्मारयति नेव नियोगगतिः। नायं विष-
योगः। भीषयिंदर्नीतिसेत्तवनीतिपरिहरति। नेवमिति। प्रयोगाचोदनात्तावादर्थः कत्वमवित्ताचात। लौकिकवैदिकयोः श्लिष्टतदर्थयो-
रेकत्वान्न कश्चसंदेहः। लौकिकवैदिकयोः पदयोस्तेदाऽहाद्वप्राह्येला कावगतसंबंधस्य शब्दस्य वेदो बाधकत्वाद्भूत्‌ यत्र शब्दार्थैक्यं॥
ध्यपदश्चानेदसुमापहत्वानापह्निचनिबंधनः इति यदाशब्दार्थयोरैक्यं स्यादित्यर्थः। प्रयोगचोदनानां लौकिकवैदयोः शब्दार्थौ तदे-
सत्त्वादन्यथा शब्दस्तत्सादाकार्थ्यानपतीयतननवास्तयत्र विनागएषामुपलभ्यतइति सूत्रार्थः। सिद्धमापहदंदइत्यत्र सिद्धिः

ना१ स्वरूपलाभोऽनुत्पत्तिर्वेतिविकल्प्याद्यंदूषयति। स्वरूपेति। लब्धसत्ताकस्य न स्वरूपलाभार्थमानापहरणमित्यर्थः। द्वितीयम-
नुवदति। अनित्यत्वं कोप्यति। अवगतस्यावगत्यर्थमपिनमानान्तरापेक्षेति परिहरति। अनित्यत्वे कस्येति। कस्य नहि मानान्तरा-
पेक्षानतत्वाद्वानराङ्कावितितातननदर्थिमानतरसंत्तवो नसि[illegible]द्धकार्यवेत्यर्थः। पष्ठपक्षमादत्ते। क्रियामिति। क्रियास्वीकारे-
तद्वारेण विधिनिवेशोऽन्यथावाकात्वत्तंगइत्यर्थः। निराचष्टे। क्रियेवेति। अपेक्षापियाग्राक्रियायामवत्तवते[illegible]तीति
विधायेवमास्वीकार्येतिशंकते। क्रियाचेति परिहरति। तद्धीति। तच्चममस्य देहब्रह्मास्मीत्यादावस्यादिका क्रियायाग्यास्तीत्यर्थः।
क्रियास्तित्वकर्मणातत्रमभावतफलेनवत्तवितत्वमत्राह। कर्मचादिति। अन्तरकर्मकक्रियावचनवादात्मनो नित्यत्वाद्वेत्यर्थः।
पदार्थसंसर्गमेगीकृत्योक्तं इदानीं सापिनास्तिवाक्यस्याखंडार्थत्वादित्याह। असंसृष्टेति। सत्सामान्यं ब्रह्म सदादिवाक्यार्थं- गा२
अतः सामान्यविशेषसंसर्गार्थत्वं वाक्यस्येत्यत्राह। [illegible]सइति। अद्याहत्तानानुगनव्यगात्मनासत्यात्मेति सदर्थस्य ब्रह्मणो-
त्तिसंबंधसत्तासामान्यमननासदविद्यादिवाकोतनानाद्यत इत्यर्थः। किंतद्धि सदादिपदप्रतिपाद्यमत्राह। शब्दादीति। शब्दाद्यगा-

वरत्वादेनाबाध्यत इति व्याख्यातमत्रादौ। लक्षणेति। सदात्मनि त्रिंशत्। नत्वप्रामाण्ये नानपेक्षत्वसिद्धिर्मानयोग्यत्वस्य सत्त्वपदार्थत्वादि
त्यैति गुरुमतमाशंक्याह। यद्वापीति। मानेत्यायोग्यत्वस्योपलक्षणं। विशेषणं वा। आद्येमानस्यामयत्वाविशातावादेनपेक्षत्वसि
द्धिरित्यर्थः। द्वितीयं व्याचष्टे। मानेनारणेति। अनुवादकमपि प्रमाणमित्यत्र नवप्रत्ताकरनत्वेयद्यपि न किंचिन्नष्टं तथापि
दृष्टांतनोक्तं साधयति। उपगतीति। मा तरावगतगमकलौकिकवाक्यस्यैव वेदांतानामपि प्रामाण्यमित्यर्थः। आप्तवा
क्यप्रमाणमिति वादिनामुक्तेन्ताध्यकारणोक्तवादसंप्रतिपन्नमुद्दाहरणमत्रादौ। ज्ञानेति। आप्तवाक्यं वक्तृज्ञानेन निरु
पेक्षं प्रमाणमित्यर्थः। तात्पर्याकारस्य नर्दिकालसंधिरत्वाद। मानांतरेति। वक्तृज्ञानानुमानद्वारा अर्थधीहेतुत्वादर्थ
निश्चायनिरपेक्षत्वं नास्तीत्यर्थः। अर्थनिश्चायकत्वासावादाज्ञानपूर्वविरचितवाक्ययोः प्रामाण्यमप्रामाण्यं वा तुल्यं स्यादत्रा
ह। मानयोगपीति। एवमाप्तानाप्तवाक्यविलक्षणं अपूर्ववाक्यं कथमर्थं बोधयद्वारावाहत इति। मानद्वारणा अर्थेपि मानत्व
मित्यर्थः। दृष्टांतप्रतिपादितमर्थं दार्ष्टांतिके समर्थयति। एवंवेति। स्वरूपज्ञानमेकात्म्य व्यवहारकारणमलौकिकप्र
माणं दृष्टत्वात्। एवमपि वेदांतानां वस्तुपरत्वप्रतिज्ञाहानिरत्राह। अर्थसिद्धिश्चेति। मासिद्धौ स्वरूपबोधस्य वाक्यजत्वबु
द्धिवृत्तिर्व्याप्तो सत्यामर्थसिद्धिरेकात्मविषयाज्ञाननिवृत्तिः सिद्धा वर्तिनी नपुनर्वेदांतः साध्यत इति निवर्तकत्वेन व
स्तुनि प्रामाण्यमित्यर्थः। मानयोग्यत्वं सत्यैव मित्युक्त्युपगमवादे पि निरपेक्षत्वं प्रतिपाद्यवस्तुनमेव स्वरूपसत्त्वमनुसृत्याल
किं वति। एकात्म्यं मानांतरगम्यं सिद्धत्वाद्धटवदित्यनुमायां नित्यामात्मानांतरगम्यः कार्यत्वाद्ध्यणवदित्यनुमानात्रिष्टस्यापि मा
त्यपेक्षत्वमित्यर्थः। नित्यो गम्यो स्यकार्यत्वमसिद्धमत्राह। नित्यामात्मेति। उक्तदृष्टेन निवृत्तं प्रतिव्यापारः प्रेषणा। सकारस्तु वेदेका

यापारोद्देषेण आदिपदेन निमंत्रणादिसंग्रहः। प्रेरणादिद्वारेण नियोगे संगतिग्रहात्तत्तुल्यत्वं अन्यत्वादपि कार्यत्वस्या
सिद्धिरित्यर्थः॥ नियोगो मांतरगम्यः पराधीनात्मलाभत्वात् घटवदित्याह। पराय त्तेति। कृति साध्यत्वपक्षे न कार्यं नाहृष्टं कार्यत्वं घ
टादौ नास्तीति कथं तस्य तरसाम्यमत आह। यत्त्विति। कृत्युद्देश्यत्वं प्रधानत्वं स्वयोद्दारावेति कृतिसाध्यत्वमात्रं कार्यत्वं घटादिष्वप्यस्ती
ति न साध्यविकल्पमित्यर्थः॥ कार्यताधीविषयत्वं नियोगस्य कार्यत्वं तन्न लिङ्वाच्यत्वात्मकस्तु प्रेरणादिष्विति साधनविकल्पामवस्थे
कातंऽयथेति। कार्यमिति। अपूर्वे घादिव्यपदेशमित्यन्वयः गमा कार्यताधीविषयत्वं घेषादिष्वपि तुल्यमिति परिहरति। न त्विति।
वैदिकलिङादिजन्यज्ञानं कर्तव्यतया भूविषयं बाधयति न लौकिकं लिङादिजन्यज्ञानमिति वैलक्षण्यमाशंक्याह। प्रमाणेति॥
ज्ञानं स्वविषयकं एवज्ञामयात तास्य इष्टसाधनत्वमनिष्टसाधनत्वं वानुमाय कर्तव्यतामकर्तव्यतां वा प्रतिपद्यत इत्यर्थः॥
ब्रह्म मांतरगम्यं सिद्धत्वाद्घटवदित्यस्यातिप्रसंगत्वमाह। इदानीं नियोगव्युत्तिचारमाह। सिद्धत्वेति। अनुष्ठानानंतरकालं नियो
गस्यापि सिद्धिरित्यर्थः॥ नियोगसाध्यैकस्वभावस्य न कदाचित्सिद्धत्वमत आह। यागादीति। स्वर्गोद्देशसिद्धविधिविषयत्वोपाता
दित्यर्थः॥ ब्रह्मणि मांतरानुप्रवेशमस्य पगम्य प्रतिबंद्यावेदांतप्रामाण्यं साधितं इदानीं तस्य तावता नास्तीति आह। ऐकात्म्ये
ति। ऐकात्म्यं मांतरगम्यत्वं तावद्वाक्येत्तवदिति। वेतानजडावापाधरित्वादामात्रादीति। यत्र मात्राद्याबाधानन्नानं तावत्वेत्यर्थः॥
क्रियामात्रस्य संसर्गे प्रयोजकत्वान्नावदांतप्रत्युविधिसंबंधइत्यत्र केतचावादयति। विध्यर्थेति। वेदांतपदार्थसंसर्गो निया
गाधीनः वैदिकसंसर्गत्वात कर्मवाक्यपदार्थसंसर्गवदित्यर्थः॥ लौकिकसंसर्गस्यापि तथात्वाद्धेद कत्व विशेषणं व्यर्थमत
त्राह। लौकिकइति। रचनान्यथानुपपत्त्या सिद्धइत्यर्थः॥ रचनानुपपत्त्या लौकिकसंसर्गस्य मांतराधीनत्वं साधयति। रचनात्विति।

मानांतरेणार्थं वगम्य विवक्षितसंबन्धस्य प्रतिपन्नाय वाक्यप्रयोगाल्लौकिकसंसर्गस्य मानांतराधीनत्वमित्यर्थः॥ निपक्षे बाधकमा
हा एवं त्विति॥ लौकिकवैदिकसंसर्गे प्रयोजकानां नेत्रीकारेऽत्रत्यं तवाक्यार्थप्रत्ययाविमः स्यात् इत्यर्थः॥ यान्यन्तरपदार्था
धीनः संसर्गो न लिङाद्यर्थाधीनः इति परिहरतीत्युक्तं इति॥ संगतेर्विध्यधीनत्वं दूषयत्यङ्गीकृते॥ संसर्गस्य हीति॥ संसर्ग
स्याकांक्षादित्रयायत्तत्वेऽपि मात्राधीनत्वे विध्यानर्थक्यं किं स्यात् स्वविषयसंसर्गस्याप्यन्यतो लब्धतया स्वस्याकिंचित्करत्वादि
त्यर्थः॥ संसर्गस्य नियोगकार्यत्वे नामपदार्थविदयर्थमिति सिद्धांती वादयति॥ नन्विति॥ इतरपदानामर्थमात्राधीनत्वेन
साफल्यस्यैव अत्र वादाविशिष्टेति॥ फलितमाह॥ एवमिति॥ उक्तया रानर्थक्यं सममित्यर्थः॥ परः परिहरति॥ लिङादिपदस्य
मानांतरानवगतनियोगविषयत्वाद्विषयांशेऽपि मुख्यो विधेः संसर्गोऽपरं नन्वनार्थतानियोगबोधकत्वं न स्यात् नियोगस्य
सर्गे विषयत्वादाता विध्यानर्थक्यन्तः संसर्गे इत्यर्थः॥ नामपदानामपि संसर्गोपि तत्र मन्तव्यतामानर्थक्यं समानमेवत्याह मानां
तरेति॥ अनुवादकत्वेनामानत्वान्न संसर्गोऽवरूपकत्वमित्यर्थः॥ लिङादिपदमगृहीतसंगतिके बोधकं गृहीतसंगतिकं वा॥ आ
अप आद्यं दूषयति॥ अग्रहीतत्वादपीति॥ गृहीतसंगतिकोऽबालेपि लिङाद्यर्थावगमपूर्विका प्रवृत्तिः स्यादित्यर्थः॥ द्वितीयं शंकते॥ आ
ख्येति॥ मानांतरावगतबोधकत्वेन नामपदानामिव संसर्गोद्देपकत्वं न स्यादित्याह॥ सिद्धार्थमिति॥ प्रथमकल्पदोषांतरमा
हास्वधर्ममेवेति॥ उपसंहरति॥ तस्मादिति॥ संगतिज्ञानापेक्षया बोधकत्वं वाक्यस्येव न पदस्य नियोगोपि वाक्यार्थ इति
तिसंतावनामात्रेण मानांतरमुपस्थापयति॥ वाक्येति॥ लोकसिद्धो वाच्यवाचकलक्षणः संबंधो वाक्यस्य वाक्यार्थेन योगा ५२
नत्वपदस्य पदार्थेन इत्यर्थः॥ दूषयति॥ तद्धीति॥ तस्य गामानयेति वाक्यस्य गवानयनलक्षणविशेषमात्रविषयत्वात्तस्य गावे
न

घनादिविशेषांतरस्योपस्थापकत्वाभ्युपगमे तु विशेषसंगतिग्रहप्रसंगेन तस्यानैतन्नाशक्यबाधकस्याकं संबंधीर्नस्यादित्यर्थः ॥ सा
मान्यविशेषस्यैवस्यागाच्च स्य विशेषनिष्ठत्ववद्विशेषस्यापि विशेषांतरवृत्तित्वमित्यतश्चाह ॥ ननित्यादत्वमाह ॥ नैराकांक्ष्येणेति
विशेषस्य विशेषांतरत्वं ग्रहत्वात्तावादित्यर्थः ॥ स्यात्तदपि पदस्येव पदार्थेन संबंधधीर्नितावता नियोगस्यामाँतरगोचरत्वं स
क्षावगात नियोगलिङादेः संबंधग्रहणमिति ॥ प्रागुक्तं क्वचादित्याशंक्याह ॥ संबंधमिति ॥ उक्तमस्य हग्रहणमुक्तेश्लक्षणाध
मस्य ह्वदावगतिनियोगमध्यमस्य ह्वग्रहत्वात् संबंधग्रहात्तदहतियन्मन्यात तन्नमच्युगित्यर्थः ॥ मध्यमस्य द्वयस्य त्वामनु

आ मीयमानत्वाच्छब्दैकगम्यत्वविरोधादिति ॥ दृत्तमाह ॥ नृवेति ॥ तस्यानुमानस्यशब्दावगतनियोगप्रवृत्तेः शब्दैक
गम्यत्वं नियोगस्येतिशंकते ॥ तस्यापीति ॥ अनुमानस्य पूर्वं लिङर्थं प्रवृत्तत्वाच्छब्दबोधा ॥ किमित्यनुमानपुरःस
रानस्यादित्याह ॥ लिंगतेति ॥ एतन्नस्यस्ययति येनाछ्वांबाधापीति ॥ नत्वपूर्वलिंगयोः ॥ स्य प्रयुक्ता लिंगमेव लिङर्थ्येपदार्थं प्रवे मण
शदृतिविशेषमाह ॥ नियोगमिति ॥ नियोगगोचरलिंगव्याप्त्याभिफलितमाह ॥ व्यर्थदिति ॥ इदियगम्यप्रवृत्तिरूपकार्यलि
गानानुमेयत्वात घटवन्नशाब्दैकगम्यत्वमित्यर्थः ॥ नियोगामांतरगम्यः परायत्नात्मलानत्वात घटवदितियदुक्तं पुरस्तात्
तत्राहत्वमिद्धिमिसिद्धा वालोकिकन्यायेन शंकते ॥ नवदिति ॥ नियोगमंतरणऽहलौकिकस्यकर्मणः स्वर्गाद्यसाधकत्वादनुष्ठानवि
रथ्यमितिपरिहरति ॥ कार्थं इति ॥ अनुष्ठिता याग ऽनादिमिदनियोगद्वाराफलिष्यतीत्यत्राह ॥ सिद्धेति ॥ एवं यागतान्या नियोग
इत्युक्तं एवमपिन तस्यालौकिकत्वं मध्यमस्य हनातरणशब्दावगततरत्वात्मध्यमस्य स्यानुमानप्रवृत्तेरित्याशंक्यातस्यापि
गृह्य पूर्वं वादिशैवे तव्यवंवयति ॥ व्याप्यस्यावेति ॥ अनुमानव्याप्यमानिश्चययस्यापयत्तावानलौकिकत्वं निश्चययइत्याशंक्य नि

योगं शाब्दे नोबुध्येत तत्र परं वयमिति द्वैधेति। अनुमानमिद्धनियोगानुवादकत्वं लिङादेरित्यर्थः॥ शाब्देन सदा तन्न विषयत्वादनुमा
नस्याप्यनुवादकत्वमत्राह। बुध्यत इति। यद्यपि बालःस्वेन शाब्दावगतमनुमानान्नाधिगच्छति तथापि मध्यमवृद्धेन शाब्दावगतम
नुमिमीत इति लिंगस्यानुवादकत्वमत्राह। भिन्न इति। एकेनावगतार्थ इति भिन्नेऽन्येन वा विषये याधीरन्या बोधकत्वरिज्ञातं तरे
ङायत। मानानुवादो निवृत्संगादित्यर्थः॥ नियोगस्य प्रवृत्त्यानुमेयत्वं स्वीकृत्य वस्तुं न रसाख्यमुक्तं। इदानीं तदेवानास्तीया
त्वप्रवृत्तीति। प्रवर्तकमात्रे प्रवृत्तिसिद्धेः परिशेषान्नियोगसिद्धिरत्राह। लौकिकेनेति। बालस्य प्रथमज्ञानादिमूलप्रवृत्तेरस्मा
नादरिष्टसाधनत्वं मूलमिति तस्यैवात्मवृत्तेतानानुमानादित्यर्थः॥ स्वतंत्रप्रवृत्तेः कार्यधियाप्यास्तत्त्वमुक्तमित्यत्राह। कार्ये ति
पलायनप्रवृत्तौ सर्पादिज्ञानस्यापि हेतुत्वादित्यर्थः। इतिकर्तव्यताचोपलक्षितहितसाधनत्वस्य प्रवर्तकत्वं बलादापादयति।
पुंप्रवृत्तेरिति। इष्टसाधनताया वाकार्यत्वं प्रवृत्तेः फलं तदेव कार्यं विध्यर्थो लिङादिना प्रतिधीयमानं प्रवृत्तेः कारणमिति नियोग
वादिनो राद्धान्तमनूद्य विरोधं दर्शयति। प्रवृत्तेरिति। फलमप्रवर्तकमिति साधिते वोच्यते तदेवं विधविरुद्धत्वं नानु
मन्तः फलस्येति फलकार्ययोरेकत्वं स्वीकुर्वता सिद्धस्य प्रवर्तकत्वं स्वीकार्यमित्यर्थः॥ वस्तुबोधस्य प्रवर्तकत्वेऽपि का
र्यत्वफलमविरोधादत्राह। अपसर्पस्येति। सर्पादेः सकाशादपगमनस्य कार्यफलं दुःखनिवृत्तेः फलत्वादित्यर्थः॥ न हि दुःखनि
वृत्तेरेव सर्वत्र फलत्वोपपत्तौ न तदतिरिक्तसुखसिद्धिरत्राह। नवेति। दुःखाभावस्यापि सुखोपजनकत्वेन फलत्वमित्यर्थः॥ लिङादिपद खर
स्य संसर्गाद्रूपकत्वप्रतिक्षिप्ततदर्थस्य नियोगस्य संसर्गाद्रूपकत्वमिति शंकते। नियोगोऽस्येति। साधानतिकर्तव्यफलाधिका
रिसंसर्गीति विरुक्तानुपपन्नत्वान्नियोगस्य प्रमाद्रूपो विधिशब्दप्रकाशितः॥ तस्मान्मानान्तरानपेक्षासंसर्गाद्रूपकत्वेन से ५२

समर्थप्रमेयत्यर्थः॥ नियोगस्यापेक्षत्वेनाक्षेपो वा मानान्तरस्य द्वा। नाद्य इत्याह। स्वर्गे वृत्तमिति। नियोगबोधनोपक्षीणत्वादिति नियावता नद्वि
तीयः अनुफलेनाक्षिप्याद्धानावति। नियोगस्य मानान्तरगोचरत्वे दोषमाह। कृत्स्नेति। अकृत्स्नप्रवृत्तो कादाचित्कत्वाद्वाक्यमिति।
अकृत्स्नप्रवृत्त्यनन्तरूपगमादित्यर्थः॥ अनन्यसाधारणविषयत्वात्वान्न नियोगस्य प्रामाण्यमित्याह। प्रामाण्यं वेति। तदुपपादयि
तुं विकल्पयति। किमिति। किं यागादेः संसर्गो वा यागादेः फलसाधनत्वं नत्यर्थः॥ आद्यं निरस्यति। नेति। यागादिपदादेव तत्प्रतीते-
रित्यर्थः॥ द्वितीयं दूषयति। लौकिकापीति। यागादिपदार्थसंसर्गोऽन्यविधिधीनालौकिकत्वादित्यर्थः॥ लौकिकत्वं साधयति। विद्या
मात्रवदीति। राज्ञः पुरुष इत्यादिविधिविकलवाक्ये संसर्गदर्शनादित्यर्थः॥ तृतीयं शंकते। फलेति। स्वर्गकामिनो यागेन नियोगानुपप-
त्त्या यागस्य स्वर्गसाधनत्वं गम्यत इत्यर्थः॥ प्रकृत्यस्येष्टसाधनत्वं प्रत्ययार्थ एव तत्रास्तु लाघवादिति परिहरति। नेवमिति। नियोगप्रा
माण्यनिरसनफलमुपसंहरति। तस्मादिति। नियोगानात्वपि विदप्रामाण्यमस्तु सिद्धमित्यर्थः॥ निनिमित्तत्वादिपदार्थसंसर्ग
एवतस्यादत्यन्दा। तस्मात्सर्वेति। अयमतिप्रसक्तो राज्ञः पुरुषोपसार्यतामित्यत्र राजपदस्य पुत्रपादिनान्वितस्य निराकांक्षत्वस्य पुरुष
पदेनान्वयादाकांक्षासंबंधकारणाभावान्न नास्ति वदिव्यादावप्याप्यार्थनन्वयाद्योग्यतापिकारणं नित्यवाक्यगतायोः संसर्ग
सन्निधिरविरुद्धेत्यर्थः॥ एवं निष्फलत्वेन विधेर्निरस्तत्वे तदन्तर्भूतविधिरूपेतत्य अप्यथा पक्षस्यानुपपत्तिरिति वादयति। नन्विति
यथाग्नेयोऽष्टाकपालाः कर्तव्य इत्युत्पत्तिविधिः कर्मैकर्तव्यतामालोचपर्यवस्यति न प्रवर्तयत्येवमात्मा द्रष्टव्य इति विधिज्ञानक
र्तव्यतायां प[illegible]र्यवस्यति न प्रवर्तयतीत्यर्थः॥ तर्हि प्रवर्तकाभावात् द्वार्थो विधिरत्याह। कामेति। आग्नेयोऽष्टाकपाल इत्या
दिविधिनोत्पन्नस्य दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यनेन प्रवृत्तिस्तद्वदिहाप्यत्र प्रज्ञां कुर्वीतेत्यधिकारबलेनान्मोद

कामिनो वहितज्ञाने प्रवृत्तिरित्यर्थः। विधिद्वयं विविच्य दर्शयति। अप्रवृत्तेति। उत्पत्तिविधिना अपूर्वमबुद्धबोधेन मधि-
कारविधिनानुप्रवृत्तप्रवर्त्तनमित्यर्थः। निगमयति। एवमिति। दूषणं संस्रवति। नानुपपन्नीति। किं तदित्यत आह। कर्मेति।
कर्मोत्पत्तिविधेर्व्यापारः कर्ममात्रबोधनिःफलनपर्यवस्यतीत्यर्थः। कुतः। हि पर्यवस्यतीत्यत आह। कीदृक्त्विति। उत्पन्नस्य क-
र्मणः फलाकांक्षत्वादधिकारसंबंधनियोगाद्वारा अनुष्ठानपर्यवस्यतीत्यर्थः। उत्पत्तिविधिमित्युक्त्वा ज्ञानस्याधिकारविधि-
संबंधस्त्वात्रापीत्यत आह। अधिकारेति। प्रमाणवस्तुपरतंत्रत्वादित्यर्थः। आत्मनः सत्त्वमित्वेनाधिकारसंबंधाभ्युदा-
राज्ञानस्यापि तस्य गतिरत्राह। यस्येति। सिद्धत्वादित्यर्थः। विधेयत्वेनास्ति मनात्मज्ञानस्याधिकारिनियोगसंबंधस्ताववृत्तांते
नाद्धा। ब्रीह्यादीनि। एवमात्मज्ञानमपीत्यर्थः। शाब्दज्ञानस्याविधेयत्वेपि तदन्यस्य मनसस्य विधेयत्वाद्विधिपरत्वं वेदांतानामित्या-
ह। अन्योपीति। इतिकर्तव्यतावाकरणमात्रं न विधेयमत्वात् आह। सोपायइति। शमाद्युपगमसहितः साक्षात्कारफलः पश्येदित्या-
दो विधीयत इत्यर्थः। पश्येदिति दर्शनं विधीयते न प्रसंख्यानमत्राह। दर्शनस्येति। साक्षात्कारस्य फलत्वेनाविधेयत्वात् मनसा-
ध्यसाधनत्वाव संबंधसंबंधीव प्रसंख्यानरूपायत्नोलक्षणा विधीयत इत्यर्थः। सोपायइत्येततस्पष्टयति। शमादीति।
अर्थवादस्यालिंगत्वात्प्रसंख्यानविधिरित्याह। सर्वमिति। इदं सर्वं यदयमात्मेति गुणवादो यं प्रत्यक्षादिविरोध-
दित्यर्थः। मंतव्यो निदिध्यासितव्य इति मननध्यानयोर्विहितत्वात् किमत्र लक्षणया न विधिकल्पनेनात्राह।
मननादीति। तत्रोत्पत्तिविधिसिद्धस्यानुष्ठानार्थमयमधिकारविधिरित्यर्थः। पारवानदिति। अनेन प्रसंख्यानं विध-
त्तमप्राक्यमिति सिद्धांतीवादयति। पश्येदिति। आत्मदर्शनकामः प्रसंख्यानं कुर्यादिति पश्येदित्येनप्रयत्नो विधी

त्थय२ त्त२

यतोवत्सदाविधीयमानयत्नसाध्यत्वाद्दर्शनंफलंस्यात्तन्नतस्यलक्षणसिद्धस्यैवलक्षणत्वाद्वाश्रवणादिदर्शनसंबंधमंतरेणप्रसंख्या
नविध्ययोगाद्दर्शनोपलक्षकमुपपद्यतेतर्हितदनुष्ठानान्नियोगवशसिद्धत्वान्नतत्फलमित्यर्थः॥परिहरतिलोकइति।शास्त्रश्रवणादेर्दर्श
नप्रसंख्यानयोःसाध्यसाधनभावोलोकसिद्धइत्यर्थः॥किमतस्तत्राह।अवादपीति।प्रसंख्यानंदर्शनसाधनंभवतिनवेतिविचारे
दर्शनेनप्रसंख्यानमुपलक्ष्यदर्शनफलेनविधीयतेतयोःसंबंधमात्रस्यसिद्धत्वादसंबंधादसतस्थोपलक्षणत्वाविरोधा
दित्यर्थः॥दृष्टांतेनेनसाधयति।सामान्येनेति।कषायपानंसामान्येनज्वरनिवृत्तिकंदृष्टंतत्कृष्टज्वरस्यनिवर्तकंनिर्वर्ति
संदिह्यतन्निवर्तकत्वेनांगविशेषविशिष्टंविधीयतेयथातथालोकदर्शनसाधनंप्रसंख्यानंभवदपिस्यात्तन्नतुविधेयसा
धनंस्याद्भवतिविशेषणोपदिश्यतइत्यर्थः॥लोकप्रसंख्यानात्मामाणिक्यसाक्षात्कारदर्शनात्सामान्यतोपिनसाध्यसाध
नतावासिद्धिरित्याशंक्याह।नइति।सत्यमादित्वतोनूनेतिदर्शनोदृष्टौनप्रसंख्यानविधानान्नेतरेरागमनतरप्रमाणैःप्रसं
ख्यानाद्दर्शनात्तावन्निश्चीयतेतावाद्वितीयमानेप्रसंख्यानंदर्शनफलायतत्त्वद्वितितावः॥अतावन्निश्चीयतेतावादित्यत्रयुक्तं
प्रसंख्यानस्यदृष्टफलत्वात्कृष्यादिवदनंतरफलत्वानुपलंभेतन्नतद्भावतिनिश्चयादनादापश्चाद्भावितानकारीय
दितुल्यंप्रसंख्यानंकिंतुशिवादिवत्तुल्यं।एवंचविशादि[illegible]दैनंतरंफलत्वंस्यात्तदनंतरादर्शनजन्मांतरंभवतिनिवर्ततिवीक्षायांतु
नवेत्यवश्यंतावन्निश्चीयतात्तावाद्धावाप्रमाणपादवश्यंभवतिविकल्प्यातस[illegible]यथाएवमिहापीत्यर्थः॥अदृष्टाश्रुतकल्पनायां
स्वपुष्पाद्यविकल्पनीयंनिवारकान्तावादत्राहापैरवशाप्यस्मितिश्रुतत्वादत्वापायासाध्यत्वान्नतवश्यंभवतिविपर्ययनिश्च
यान्नविधिबलादनुपादेयस्यकल्पनमित्यर्थः॥प्रसंख्याननियोगस्वीकारेत्रयंतानांविधिपरत्वादेकात्म्यासिद्धिरित्याह।एव॥

एवमिति। प्रसंख्यानविरोधेरकात्म्यज्ञाननात्पयेत्वसिद्धिरित्यर्थः। नु तत्त्वज्ञानोपदिश्यत इति ज्ञायादेकात्म्यश्रुतिरवविधि

५२ त्वापत्रयुक्तेन तु न विधिस्तत्र वमत्राह। विधीति। यद्यप्यत्र विधेः प्राधान्यमस्ति तथापि तत्रापि प्रवत्ते तथाप्यत्र विधिप्राधा

न्यस्वीकारे प्रमाणान्तरावादिकात्म्यं न सिध्यतीति तन्न विधेरन्यत्रापत्रमिष्टमित्यर्थः। तत्त्वमादिवाक्यादेव तत्सिद्धिरित्याह।

तत्त्वशास्त्रमिति। तत्त्वमादिवाक्यस्य विधिपरत्वे स्वार्थेन प्रामाण्यं प्रत्यक्षादिविरोधादित्यर्थः। तत्त्वमादिवाक्यस्य स्वा

र्थपरत्वे तु एव वस्तुनः सिद्धे दृष्टार्थो विधिरित्याह। तृप्तिशास्त्रादिति। तर्हि प्रसंख्यानविधानादेवैकात्म्यसिद्धेस्तत्

त्वमादिशास्त्रेणेत्याह। मानानतेति। न हि दृष्टावियोगतः तत्साक्षात्करणेच्छानुपपत्तेरिति यावत् तत्र स्वात्मनिशा

स्त्रादुत्पन्नमानं विज्ञानमपरोक्षमात्रस्य यत् तत्र स्वात्मनोपरोक्षत्वादन्यथा न तत्र ज्ञानाभावात् पन्नमिति भाष

ज्ञाकारोदाहरनप्रसंख्यानविधानानुपपत्तिरित्याह। श्रुतेरिति। यः श्रुतेरवगतात्मतत्त्वः स शास्त्रसंवित्तावात्म

परोक्षमेव वागच्छतीति तत्स्थानन्तरं तमपि स्वके स्थाने गच्छतः प्रसंख्यानं पश्यदिति विधीयत इत्यर्थः। वस्तुबाधकत्व

प्रसंख्यानविधायकत्वे वार्थात्तदा वाक्यात्तदर्थं स्यादित्याह। स्वव्यापारेति। शास्त्रस्य स्वार्थे प्रतिपादने प्रसंख्यानं स्वार्थैकं

तरव्यापारस्ते नार्थात्तदा वा वान्नवाक्यात्तदित्यर्थः। हि करते यथार्थं द्वयप्रतिपादकात इत्यर्थः। प्रसंख्यानरूपव्यापारे

णाप्यवधानाच्छास्त्रस्य नार्थाबाधकत्वमत्राह। स्वव्यापारेति। योगमप्यवधायकमिति ज्ञायादित्यर्थः। तत्त्वमादवैस्तु

परत्वे प्रसंख्यानविधानोपपत्तिरित्युपसंहरति। तस्मादिति। शाजन्यधीमात्रेण स्वतार्थबाधानुसन्धानोदाहरनप्रसंख्यानं

विधेयमत्राह। बाधयित्वेति। पारोक्ष्यधीमात्रेणाकेवलायायागादपारोक्ष्यधीद्वाराकेवल्यार्यं तं स्याक्रियत एव शास्त्रं इतर ५५

थाऽऽत्ममर्थपर्यवसायित्वेनाप्रामाण्यप्रसक्तेरित्यर्थः। शाब्दस्य परोक्षधीहेतोरपरोक्षधीहेतुत्वं यत्तावद्विरोधाद्युक्तमत्रा
ऽपरोक्षेति। असंभावनानिरासफलां युक्तिमंगत्वेन स्वीकृत्य परोक्षप्रमां करोत इत्यर्थः। अन्वयव्यतिरेकाभ्यां युक्तेरेवब्र
ह्मात्मत्ववादे तु वाक्यस्य प्रसंख्यानापायाद्वैयर्थ्यमत्राह यथात्मेति। सा युक्तिरप्यात्मसाक्षात्कारं जनयितुमशक्तापरोक्ष
धीहेतुत्वस्यात्ताख्यानात् तस्मात्प्रसंख्यानं शास्त्रं वस्तीकृत्यैव प्रवर्तत इत्यर्थः। तर्कादेर्नशास्त्रानुग्राहकत्वेन तद्ग्रहवतः श्री
माण्यादत्राह यावदीति। शाब्दी युक्तिमात्मानं प्रसंख्यानं वाऽप्यपद्यवस्तु साक्षात्काराद्बाधयन्निर्दिष्टं प्रतिबाध्यमान्यत्प्रवर्तमानः श्री
माण्यं लगनात तर्कादिप्रवृत्तिर्बन्धविगममात्रकारित्वादित्यर्थः। वाक्यस्य संसृष्टपरोक्षधीहेतुत्वस्वाभाव्ये न प्रसंख्यानस्य तत्ता
पिनिवर्तीत्यत आह। समर्थेति। यत्तावताह्वरमरणादिकारिणा दष्टविषादमेव शर्करासंपर्कोऽतुष्टिकरत्वप्रतृप्ता स्वस्य न
संसृष्टत्वप्रत्ययप्रकारिणोऽपि मदकारित्वेदानद्विपरीतप्रत्ययकारित्वमित्यर्थः। शास्त्रमसंसृष्टपरोक्षं वस्तुगमयतीति तदसंसृ
ष्टपरोक्षत्वं तावन्मवतदत्राह यत इति। अवेद्यापरोक्षस्वरूपे श्रुतितात्पर्यलिंगमाह। निर्वर्त्यमिति। नबिलेतिकु
तश्चानतिफलश्रवणादित्यर्थः। विधिं प्रतिप्रधानत्वमित्यस्तुक्तं युक्तं अनुत्तवोद्द्योतन प्रसंख्यानविधिसामर्थ्यात्प्रसंख्या
नादवान्तरवसिद्धेरत्राह। शास्त्रेणेति। तत्त्वमादिवत्साब्रह्मणोऽनतिध्यानशास्त्रे ब्रह्मण्यप्रतिपन्ने प्रसंख्यानमनि
त्यामपि विषयत्वेन ब्रह्मणः प्रागवगमानन्तरज्ञातत्प्रसंख्यानद्यावर्तकज्ञानविषयत्वेन प्रागवगमेन तद्ज्ञात इति याव
त्। अतस्तुल्यं वाऽद्वयोः प्रसंख्यानात्रिधिश्रुत्योरनुपपत्तिस्तुल्या। यथा शास्त्रं प्रसंख्यानं विनाऽनुपपन्नं तथा प्रसंख्यानम
पीति तुल्यं परस्पराश्रयत्वमित्यर्थः। प्रसंख्यानविधेरन्तिधश्रुत्यपेक्षायामपि न तस्याः स्तपदे ह्रचं स्वार्थप्रतिपादनसा

मोमेऽर्थे व्याख्याने सर्गिकत्वादत्राह। विधिमिति। श्रुते काम्यः शास्त्रमात्रादवगततत्त्वो विधिर्विना तदर्थावगमादृते प्रसंख्याननि
योगात्तावन्न तदर्थानुत्तावात्तावात्र स्यापायमनयाज्ञानत्वादे काम्यशास्त्रस्यार्थवादतां कुर्यादप्रामाण्यं मन्येत। अन
न्वतः शास्त्रं प्रसंख्यानापेक्षमित्यर्थः। न हि शास्त्रस्य प्रसंख्यानस्वरूपोपकारितया तदंगत्वात्सुयुक्तं प्राधान्यं प्रत्यक्षतिरि
त्याशंक्य विधिस्यातेत्युपदेहीत्युक्तं प्रपंचयति। विधीति। विधेः स्वतंत्रत्वेऽप्रतिपन्नश्रुतेः स्वच्छे प्रत्येतत्ता हयवत्स्वसिद्धत्व्यु
परत्वे मानांतरविरोधादवताधिकरणन्यायानवतारादृता विधेरकाम्यनिवेदनं तत्र वा प्रतिफलं द्वताधानवकल्प्य
स्यादतो नि विधिनिष्ठमेकाम्यवाक्यमित्यर्थः। शास्त्रादवगतवस्तुतत्त्वस्यापि प्रसंख्यानोपायोपदेशो यो प्रसंख्यादिनाश्र
वगततत्त्वोऽपि प्रसंख्यानादिकमपह्नुतत्यनवस्थास्यादत्राह। प्रतिपन्नेति। प्रसंख्यानादिनेति शेषः। न हि शास्त्रेणावगत
तत्त्वः प्रसंख्यानादिकं नापेक्षते। विशेषादत्राह। ज्ञास्यतीति। अस्मा[illegible]त्ततः ब्रह्मास्मि तत्त्वमसीति श्रावितोऽपि श्रवणफलं।
सासाकेरणेन प्राप्नोति। अस्मात्प्रसंख्यानादविनतितदापह्नुत इत्यर्थः। शास्त्रेण प्रसंख्यानादिरपेक्षितं तद्युक्त्युपमंद
रति। शास्त्रमिति। अन्वयव्यतिरेकोऽस्यामवाम्नातुत्त्वसिद्धेः। किं प्रसंख्यानादिनात्राह। नान्वयेति। आम्नानासिद्धेकस्मु
कनान्वयव्यतिरेकावितितस्यात्मनः सिद्धेतान्वयव्यतिरेकोस्यानो। तास्मामात्मसिद्धिरितीतरेतराश्रय इत्यर्थः। शा
स्त्रात्तु केऽपि प्रसंख्यानापेक्षया अर्थबोधकत्वे दृष्टांतमाह। यथेति। विश्वजितायजेतेति विश्वजिच्छब्दस्य तृतीयांतस्य कर
णानूतया गनामधेयत्वाद्विश्वजिद्यागवाक्यस्यापेक्षितस्वर्गकामिकल्पनया स्वार्थबोधकत्वं तद्वत्तावप्रवृत्त्यात्तावाद्विश्रुति
द्यागपदयोः स्वर्गकामनस्यार्थानुपालनं कुर्वता मौनत्वं यागस्यार्थवादत्वमिति दृष्टां। तिकमाह। तद्यथेति। प्रसंख्यानेविनासा

चि५

५६

का२

स्वाकारजनकत्वात्तावात्मामाण्यन संभवतीति तावः। पूर्वपक्षमुपसंहरन्निर्गतरथ्यमेकात्म्यानुत्तवार्थमित्यर्थः। सिद्धांतयति त स्वमिति

निर स्वतिा प्रसंख्याननियोगस्य वस्तुापराक्षफलं नमासाक्षनिवृत्तिवीनाद्य इत्यादाव प्रमात्रादीनि प्रमात्रादिसाधकत्वे हेतुमाह।

संविदितिा द्वितीयं दूषयतिा पराक्षमिति। अदंकारादिजडत्वात्मीं दृपाराक्षमपि साक्षाद्यनानुदूयमानत्वात्सादिनावोतित

स्मिन पराक्षधीः कथं। द्वैतेतरमाह। आत्मरूपात्कमिति। यस्यात्म वाद्य स्मिन्निकच्चांधम सादात्मना वा तानीत्यर्थः। यस्मात्का दिति मा ४

पादयेस्या पराक्षत्वादित्यर्थः। आत्मनोप्रत्नीतिनिवृत्यर्थं प्रसंख्यानविधिरत्राह। पीति। अज्ञानमित्याज्ञानसंशयज्ञानसाधक

त्वेन स्वतःसिद्ध आत्मेत्यर्थः। आत्मनः स्वतः सिद्धत्वेवदेनानामभानत्वं स्यात्ता वादत्वाह। स्वमहिम्नेति। देहादिसाधकत्वं दृरत्व स

ध्यत्व वत्तसाधकत्मनोपि स्वद्यतिरिक्तसाध्यत्वमत्राह। सार्वेति। जडस्येवान्यसाध्यत्वमितियावत्। तत्र विद्यादिनिवर्त्तकत्वेन वाक्य

प्रामाण्यमितिनावः। आत्मनः प्राणचेष्टादिलिंगगम्यत्वात्पराक्षत्वात्त त्पाराक्षनिवृत्यर्थं वेद्यर्थं प्रसंख्यानमित्याशंक्यपराक्षम

पि सच्चितो नत्वपेक्षयति। मात्रादीति। प्रापादोवमात्रादरता वतत्वतावसामच्छितया। आत्मेष्वतायनकेनकारणेना विद्युत्वाह २५

नित्यात्वे तन्मस्वताबाइत्यर्थः। नन्वशक्ष्यत्वन्मुक्तिमित्यारत्याधिकारवार्त्तिकप्राबदोनार्थं सर्वप्रकारविधर्निरस्तत्वात स्याबदे

पुनर्निरासे पुनरुक्तिः स्यादत्राह। तावानिति। तत्तन्मतानुसारेण विधेः सत्त्वाशिद्दितइति तावः। इदं तु ब्रह्मदत्तमतावलंब

नेन विधेः सत्त्वं प्रतिपद्यते। अतो न पुनरुक्तिरित्याह। नियोगेति। पुनरुक्तिपरिहारप्रसंगात्स्वमतं नावतां निराकरोति। एका

त्म्यात्स्यादिति वंधप्रतीतिविरोधित्वेन स्वतो मुक्तत्वं प्रत्याह। अज्ञानादिति। स्वतः सिद्धत्वावनानावत्तात्वं व्यतिरेकदारणादासाध्य इति। स्वतो

मुक्तस्य तत्र मुक्त्यर्थं यथा ज्ञानमिथ्यात्तथात्तावनापीष्टतामत्राह। नामामात्रेति। असाध्यसाधनसाध्यसाधनत्वावद्दीन इत्यर्थः। प्रासंगि

कंपरिसमाप्य प्रवृत्तं प्रसंख्याननिरासमनुस्मरति॥ यदेति॥ साक्षात्कारकार्य प्रसंख्याने विषये कार्ये नियोगः साध्यं प्रतीयते यदा तदा
प्रसंख्यानविरोधिरैकात्म्यमनुपपन्नमित्यर्थः॥ श्रवणमात्रमननं न मुक्तिरस्तित्वादा॥ कार्ये त्विति॥ नु तं तत्त्वार्थमिति स्थितिरि
त्यर्थः॥ अमृतत्वकामः प्रसंख्यानं कुर्यादिति नियोज्यस्याधिकारिणो विशेषणममृतत्वमुपदिश्य विधीयमानप्रसंख्यानस्यन
त्परवमनश्राद्धा॥ विशेषणमिति॥ प्रसंख्यानं नियोगविषयः अमृतत्वं तु तेन साधनमनुवर्त्यमानफलत्वान्नियोगवि
षयस्याप्रमाणत्वादित्यर्थः॥ नियोगस्य प्रसंख्यानविषयत्वमंगीकृत्योक्तं तदपि न युक्तमित्याह नानावार्थेति॥ प्रसंख्यान
मपि क्रियेतेति तत्राह वृत्तिर्हीति॥ क्रियावृत्तिः प्रसंख्यानं न क्रियत इत्यर्थः॥ श्रवणमननावृत्तिविषयनियोगानावपि
तद्विषयं कार्यमस्तीति शंकते श्रवणेति॥ दूषयति तदेति॥ श्रवणमननावृत्तिविषयनियोगमभ्युपगम्य तत्परित्यागेनश्र
वणादिगावरनियोगमंगीकुर्वतोऽपराद्धान्त इत्यर्थः॥ दाक्षायणयज्ञेन यजेत स्वर्गकामः साकंप्रस्थानीयेन यजेत
पशुकामः संक्रमणयज्ञेन प्रजाकामो यजेतेति प्रकृतदर्शपूर्णमासयोर्गुणात्फलमिष्यते यथा तथा श्रवणाद्यावृ
त्तिगुणान्नियोगद्वारा फलसिद्धेर्न सिद्धान्तविरोध इत्याशंक्याह दाक्षायणेति॥ आवृत्तिविशिष्टत्वादेवंविधविषयत्वफलसा
धनमित्यर्थः॥ तन्त्रान्तरनिरूपितं॥ अयानस्तु चोदनां फलेतसंयोगात्प्रसंबंधात्तद्दर्शपूर्णमासयोर्दाक्षायणयज्ञेनेति श्रुतौ
कर्मान्तरं विधिः प्रकृतेनायाग्रवा दर्शपूर्णमासयोर्गुणविधिरिति संशये अ...नेषामावृत्तिगुणकेषु कर्मसु श्रुतेषु समस्त
संज्ञान्तरात्कर्मान्तरमिति प्राप्ते दक्षस्यापत्यानि दाक्षायणानि तेषामयनमावृत्तिरित्यावृत्तिगुणयोगात्प्रकृ
तदर्शपूर्णमासयोरेव दाक्षायणशब्दप्रयोगात् साकंप्रस्थायीयशब्दस्य सहप्रस्थानगुणयोगात्तेनैव वृत्तेर्न कर्मान्तरम्॥

मिति। न च ... अनुद्योतीत्यादौ केवलस्य ज्ञानस्य विधिविषयत्वदर्शनादावृत्तेरपि विधेयत्वं स्यादित्याशंक्याह गुणइति। क्रि
यापरत्वं केन वाक्येन विधेयं न केवलमित्यर्थः। विलक्षण्यान्तरमाह सोपीति। अग्निहोत्रं जुहोतीति विहितं जुहोत्यर्थमाख्यातेनानूद्य तदुपर
क्तो दधिगुणो दध्नेति विधीयत इत्यर्थः। अत्रापि श्रवणादिलक्षणव्यापारो धात्वर्थस्तदुपरक्तावृत्तिरूपगुणविधिः स्यादत आह। श्रवणादे
रिति। तत्र [illegible] कपादानावादित्यर्थः। श्रोतव्य इत्यादिविहितश्रवणानुवादेन तद्विशिष्टावृत्तिविधानमचाह गुणादिति। नापि विश्व
जिज्ञास्या यावत्तावो गुणविधेरसिद्धत्वादित्यर्थः। कस्य तर्हि विधेयत्वं दर्शनस्यैव तद्वत् न मिथ्यादापश्येदिति। दीति दर्शनस्याविधेयत्वा
दावृत्तेर्विधेयत्वमुक्तमत आह नापीति। मुख्यासंभवे तत्प्रागनतलक्षणावृत्तेः साक्षात्कारोपायतया विधानं युक्तमत आह
कार्यमिति। प्रमाणफलस्य क्रियात्वेन साध्यत्वासंभवादित्यर्थः। शास्त्रस्य युक्त्याद्यपेक्षत्वं यदुक्तं तद्दूषयति स्वयमिति। लौकि
कवाक्यवाह्यस्य तत्सापेक्षत्वेन स्वतःप्रामाण्यहानिरित्यर्थः। मानान्तरापेक्षत्वे संवादात्प्रामाण्यमिति स्वतःप्रामाण्यहानिरकी
दरमानत्वात् तदपेक्षस्य स्वतःप्रामाण्यं न विहन्यत इति शंकातामुक्त्यादीति। युक्त्या मननं गत्वा मन्नमानान्तरं [illegible] पिपासा।। द
संभूयबोधयंतीति चेदित्यर्थः। दूषयति। नेति। तैलादयः संभूय दीपमुत्पादयंति स दीपार्थप्रकाशयति तद्वत् स्यादाह संभूयमितः
स्वरूपलाभाय तत् [illegible] मयापलब्धा य इत्यर्थः। व्यतिरेकं दृष्टमाह। संभूयेति। फलमर्थोपलब्धिरूपमिति यावत्। तावदेतानां तद्द
ष्टे दूरं तु न वैयर्थ्यमंगीकृत्य मित्यर्थः। कारकाणां संभूय क्रियाकारित्वमिव प्रमाणानामपि उपलब्धिकर्तृत्वं स्यादत आह संभूयेति। क्रियाकार
कसंगतः। क्रियार्थं कारकाणां संबध्यंत इति यावत्। मिति स्वरूपलाभव्यतिरेकेणार्थव्यक्तये नान्यदपेक्षितमित्यर्थः। स्वरूपला
भतो नान्यदित्युक्तमिति स्वरूपादन्यानां प्रमाणानां मितावर्थोपलंभने सहायत्वादत आह। तालतिलश्रद्धेन यावानर्थः प्रकाश्यते

आप्तनि।

तांचानेवस्तुकथादिनागम्यत्वेऽधिकोवा। आद्यं प्रत्याह। आद्येनेति द्वितीयं शंकते। प्रमेयत्वेदान्नसंभूयकारित्वमित्याह। असंप्रा
प्तेति। एवं पादानां संभूयकारित्वे सामान्यनिरस्य युक्तीनां तन्निराकुरुते। लौकिकश्रुत्केतिराख्याशापत्वावैदिकीत्वेवी
आद्यं दूषयति। स्वत्वेति। अवस्थात्रयस्य च्युतिवारादात्मनोः च्युतिवारात् अवस्थात्रयस्थे धर्मसंबंधेन वा स्वत्वइति। लो न२
किकेनकोदात्ममिलिन्हो वदस्यानुवादकत्वमवैदिकत्वं वात्मनइत्यर्थः। द्वितीयं दूषयति। वैदिकत्वेपीति। वदगम्यान
कश्चित्तर्कोस्ति तदस्तित्वे वा वस्तुपरवाक्येन च प्रतिपन्नार्थप्रतिपादकत्वात्तर्कस्यानुवादकत्वमित्यर्थः। तेगांतरंतत्प
ति। स्यादेवेति। वदतां तर्कस्यान्यत्र करणमप्युक्तं अन्यथा लिंगप्रकरणादीनामवैदिकत्वप्रसंगादात्मानं त्रिपादेव प्र
स्यादित्यर्थः। युक्तिनिरस्य प्रसंख्यानं निरस्यति। आवृत्तिष्वेति। प्रमाणवृत्तिः प्रसंख्यानं वायेष्टं न वा वृत्याध्यादिप्र
मायेत्युतिप्रयोगाद्दृश्यात्। आद्ये न तत्प्रसंख्यानस्य प्रमाणपादत्वमित्यर्थः। संदोधकारकदूरावस्थितवस्तुनिश्चयः प्रमा
णाद्वृत्यासनवनीति प्रसंख्यानस्यातिशयकरत्वमतत्राह। यत्रापीति। तत्तिन्नविषयत्वं विशदयति। पूर्वमिति। घटपदादिम
यत्तदपि चक्षुरादिमानात्तदैव तत्रापि प्रमाणात्तदा तावर्त्तमानं प्रमाणं निश्चयकरमित्यत्राह। परिच्छेदेति। डि
डी इत्ययज्ञानास्य च परिच्छेदफलत्वं न वस्त्वादिज्ञानानामत्राह। तदत्रापीति। वस्त्वादिप्रत्ययेषु सर्वेषु पूर्वप्रत्ययवत्त्वं
तीत वस्तुरूपस्यैवानुसंधीयमानत्वान्न प्रमाणत्वदइति शंकते। आद्येति। प्रत्यक्षादिप्रमाणपंचकस्य वस्तुग्राहित्वे ते
क प्रमाणत्वापातइति परिहरति। वस्त्विति। अत्तिन्नमानतत्तिपरिच्छेदः। प्रसंख्यानस्य विधितानुष्ठीयमानस्य कारक
त्वात्न दोषैक चैमानोगत्वमित्याह। साध्यमानमिति। एकेन संभूयकारित्वमित्यर्थः। आम्नानापि संसारिणोमानांशत्वं प्रसं

सारिणो वानाद्यन्त इत्यादावमातेति लौकिकस्यात्मनः प्रमाणाश्रयस्य ननन्दैवाद्वैतं तन्त्र्यथा द्वयस्य गुणाद्यं गत्वप्रसंग
दित्यर्थः। द्वितीयं दूषयति परश्चेदिति। घटादेः प्रत्यक्षाद्यगोचरत्वप्रसक्तेरित्यर्थः। अनुत्तवापायत्वेन प्रसंख्यानविधानमुक्तं द
षयति। कथं त्वति। स्वरूपस्येविदन्तुत्वास्त्वेजकत्वनिर्वाच्यत्वमप्रत्याद्यः स्वरूपमिति। द्वितीयं निरस्यति। नदिति। प्रमा
णामवप्रसंख्यानफलमित्यत्राह तत्रेति। तत्त्वमस्यादिवाक्यफलं वृत्तिरूपज्ञानेन प्रसंख्यानफलमित्यर्थः। मतिवद्वीननपा
दानां फलं संगत्वं वदितमपि न घट इत्यादावशेषमिति। परोक्षवृत्तिः संसृष्टपरोक्षार्थधीजनकत्वं शास्त्रस्यतयोः स्वत्ताव इत्य
र्थः। शास्त्रजत्वेमिति वृद्धिहेतुत्वेदोषमादावमितितश्चेति। प्रमायस्य वृद्धो विषयस्यातिशय सिद्धत्वमितरद्धिः। अर्थनेव विशे
षोद्धि निराकारतया धियामित्यर्थः। मितिवैचित्र्यं मनतारणामयविविच्यं नास्ति मानाधीनत्वान्मेयसिद्धेरिति अन्योन्याश्रय इत्यर्थः
शास्त्रादेकात्मावगाममपि वेदन्तत्वाद्यपर्युदवं उक्तं तत्कर्मवाक्ये पूर्वसंगाद्युक्तमित्याह। ज्ञात्वाद्यापीति। शास्त्रजन्यपरोक्षधीमात्रे
ण फललाभ नान्तरस्वाध्यायस्तत्त्वात् दपेक्षातत्रौ ... पास्येति। शास्त्रं दवगच्छतद्दति संबंधः। शाब्दज्ञानादशेषानर्थनिवृत्तिर्नास्ति न
हेतापि यथा कृष्णं संसारित्वदर्शनाद्दशाद्यद्याकाववेति। रज्ज्वादितत्त्वविज्ञानं सर्पाद्याकंपनाशनं सर्पारापतत्कृतकंपपलायनादि
नाशकं कुर्वत इत्यन्वयः। विमनमध्यस्तनिवर्तकं तत्त्वज्ञानमवान्तरज्जुतत्वज्ञानवदिति तात्वः। तत्त्वमादिवाक्यस्य प्राधान्येतच्छेषत्वं प्र
संख्यानविधिरुक्तं दूषयति। गुणेति। एववाक्यत्वमप्येकार्थत्वादेकफलत्वाद्वानाद्यन्त इत्यादावस्त्विति। नद्भमादवैस्तुपरत्वात्प्रसंख्या
नविधिर्नियमपरत्वादित्यर्थः। उत्तरयो मार्गिरूपरत्वात् द्वितीयकल्पोऽनुतत्वादनावति। व्यतिरेकमुदाहरति संगतिता यदोष्नयाष्टा
कपालोऽसोऽमो स्यायामित्यादिना कालसूक्तांप्नयाहिकर्माण्याधारयति इत्यादिना वाघारादीनि कालासंयुक्तानि श्रुतानि सर्वाणि किं

पौ

सम्बन्धनानि। किमाग्नेयादीनि प्रधानान्याहो आरादीन्यंगानीति संशये पौर्णमासामावास्याशब्दयोः कालवाचकत्वेन प्रकृता
नामश्रुतत्वाद्दधिकारवाक्यस्थोपपदस्य यजिसामानाधिकरण्येन नामत्वकल्पनात्तत्परत्वाद्यागजन्यस्वरूपयागमात्र
वचनत्वात् सर्वेषां प्राधान्यमिति प्राप्ते। य एवं विद्वानमावास्यां यजत इति वाक्यद्वयस्य यजतिबलात्समस्तार्थयानुवादकत्वात्पौर्णमा ।स२
सीमावास्याशब्दयोः समुदायद्वयार्थतया प्रसिद्धार्थबाधाधिकारिकमुपादानं तत्रैवेति तदनुरोधाद्द्यन्तरपिताद्
र्थ्यादाग्नेयादीनामेवाधिकारसंबन्धस्याभ्यन्तरमन्येषामंगतेति द्वितीयेऽस्थितमित्यर्थः। अंगानामफलश्रुतेरर्थवादत्वा
त्फलवत्त्वं मिथिसमाम्नातानां तदेकवाक्यत्वे फलवत्त्वसिद्धय इत्येदं नेत्याशुक्रमिति प्रतिपादयति। अत्र इति साध्य
मनुष्ठेयं प्रसंख्यानं मोक्षस्य नोपकारकं किमनतस्तद्राहानावति। स्वर्गादिफलस्यानुपकारकं गमानादिन साधनया
गादेरंगेनत्त्ववतीत्यर्थः। प्रयाजादिवत्फलोपकार्यंगत्वाभावे श्रोतृणादिवत्स्वरूपोपकार्यंगत्वमिति। वैतद्भिन्नसंख्या
प६ नेशास्त्रस्य स्वरूपे अर्थबोधनसामर्थ्यं वा उपकारकं। आद्यं प्रत्याह। आम्नेति। द्वितीयं दूषयति। अन्वत इति। गुणप्रधान
ताभेनिराकृत्य प्रसंख्यानस्यानुत्तवफलत्वाता वं पुनरपि प्रतिपादयति। प्रसंख्यानवति। दृष्टफलत्वात्त्व संख्या
नस्य सहृदनुष्ठितादेव तस्मादनुत्तत्वात्तावामावाद मन्तरमनुष्ठानपि नत्तावा। अतो तदनुष्ठानेफलादर्शनविसंवादा
दनस्तद्विधायकशास्त्रस्यामानतेत्यर्थः। अस्मिन्काले एतावत्संख्याकं प्रसंख्यानादनुत्तत्वात्तावदितिविद्धिनवादम
न२ ननुष्ठितात्फलसंवादानावति। तथ्यादाविव फलसंदेहादपि प्रसंख्याने प्रवृत्तिरोदाद्दानापीति। प्रसंख्यात्फलस्य क
दाचिदप्युहरेरित्यर्थः। संदेहात्प्रवृत्तिश्चोक्तन्यायेनाकल्प्येति। दूरमारुह्याप्यसकृदनुष्ठायापि विसंवादपराङ्मुखः। एका ५९

नारत्वर

त्वानुवृत्त्यानुपलंभेन विशुद्धीभूतोऽन्तराले निवृत्तश्चेद्दृष्टान्तो यत्र किं विकुर्यात्कथं विद्यावद्धीव मनुष्यान्तिति भवन्ता
र्थोत्तावदन्यस्यानुवृत्तवादस्मान्नानुवृत्तवादर्शनादित्यर्थः॥ कथं पतनं नहि कल्याणकृत्कश्चिद्दुर्गतिमिति स्मृतेरत्वाद्वावृष्टेति
पतनात्तावत्प्रसंख्यानविधानमदृष्टफलं अग्निष्टोमादिवददृष्टफलस्य कर्मणो वा अनुष्ठीथविधानवत्त्वदित्यर्थः॥ अदृष्टार्थप्रसं
ख्यानं शास्त्रवाक्यमस्तु कोदोषोत्राह नानन्यश्रुतेः॥ प्रसंख्यानविधेरदृष्टफलत्वे सएव प्रधानं नावकाशोस्त्रे ताल्लेषं स्याद्वेदेकस्मा
दपूर्वत्तदितरदैवतदर्थमितिन्यायादतश्च प्रातिलोम्येन कार्यप्रामाण्याकल्पितानाविधिरप्रामाण्यायमंरतश्चेति विपरीत्येन
५६ फलं स्यान्नादृत्तमादाशास्त्रवाधनादिति॥ अन्यपरस्य प्रत्यक्षादिविरोधप्रामाण्यायोगादित्यर्थः॥ दोषांतरमाह अश्रुते
ति॥ प्रसंख्याननियोगादनुष्ठानानुपलंभादिति तावः अदृष्टफलत्वे कथमनुपलंभेनादृश्यपाचाह कार्येति॥ निर्विषयः प्र
संख्याननियोगान्न स्यादित्यर्थः॥ नियोगविषयाज्ञानावृत्तिरिति ज्ञानकारणं चावर्तनं किं विधिवाक्यं तत्त्वमादिवाक्यं वानाद्य
ज्यादावस्थितेति॥ प्रसंख्यानविधिवाक्यस्य नियोगपरत्वेन वस्तुतत्त्वाप्रतिपादकत्वादित्यर्थः॥ द्वितीयं दूषयति॥ शास्त्राद्वे
ति॥ तत्त्वमादिवाक्यस्य नियोगनिष्ठस्य परस्य प्रत्यक्षादिविरोधे स्वार्थप्रामाण्यानुपपत्तिरित्यर्थः॥ किंचं तत्त्वमादिवाक्यं
स्वार्थं न प्रतिपादयति प्रतिपादयति वा॥ तत्राद्यमनुवदति॥ यदीति॥ दूषयति॥ नस्व सिद्धिरिति॥ प्रसंख्याननियोगपरत्वात्तत्त्व
मादिवाक्यमर्थवादो प्रमाणं स्यादित्यर्थः॥ द्वितीयमादत्ते॥ अथेति॥ प्रत्यक्षादापरोक्ष्यादिति॥ वाक्याज्ज्ञानादेवात्मापरोक्षसिद्धे
र्द्धेः पारोक्ष्यहानिकृत्स्वप्रसंख्याननियोगाद्वार्थः स्यादित्यर्थः॥ वस्तुनासंस्पृष्टापरोक्षस्वतावत्वेपि शास्त्रस्वसामर्थ्यानुसारे
णसंस्पृष्टपारोक्ष्यं बाधयतीति न सांक्षात्कारणाय प्रसंख्यानविधिरत आह॥ शास्त्रादिति॥ अबाधकत्वे न मिथ्या बाधकत्वे

नर्वंशास्त्रप्रमाणं स्यादित्यर्थः। संसृष्टपरोक्षत्वेनापि बोधकत्वान्न बोधकत्वं नापि मिथ्याबोधकत्वं बाधकत्वाभावादत्राहानन्तेति। अथा
श्रितेन गवित्रसंख्यादेर्द्वारादिना सिद्धेर्विना तत्राज्ञानादस्य स्वसिद्धिः। एवं संसृष्टपरोक्षरूपेकस्मिंश्च वस्तुनि शास्त्रात्प्रतिपन्नेपि [श्रिर]
किं मायातमसंसृष्टापरोक्षवस्तुन इत्यर्थः। शास्त्रप्रामाण्यं प्रसंख्यानानर्थक्यं च परिहरन्नाशंकते। शास्त्रादिति।
श्रवणमात्रेणानुत्तवाऽरूढवस्तुशास्त्रात् सिध्यति प्रसंख्याननियोगादनुत्तव इत्यर्थः। असंसृष्टापरोक्षवस्तु निश्चितमनि
श्चितं वा। आद्ये वाक्यादेव वस्तुनुत्तवाऽरूढं सिद्धं हि नीत्येदोषमाह। वस्तुनीति। असंसृष्टापरोक्षविषयस्यैव यथा
र्थत्वं च इति। राकणानुत्तवात्मकत्वमन्यत्नास्ति यथा वस्तु त्वछांस्वार्थप्रत्ययोत्तुत्तवान्यथा प्रमाणे स्यात्तदानुत्तवात्मक
मिति वदता वस्तुनि निश्चितमिति वा तीमात्र सुक्तं। न देवं विज्ञानमर्थं शृण्वं। अर्थवादच्छस्ति। अतो नार्थवादं तत्त्वमादे [व८]
र्विना षष्ठ इत्यर्थः। तत्त्वमादिवाक्यस्यार्थवादसाम्यं किमनिष्टं तत्राह। नन्वत्रेति। यतोऽर्थवादसाम्यात्तत्त्वमादेः कार्य
परत्वे फलाद्वाप्तति। तस्मात् प्रसंख्यानवादि तिस्तन्नियोगनिष्ठं वं शृण्वेव परिस्फुक्तं वस्तुतात्पर्यविरहात्तद्बोधक
[पत्न्यप] त्वात्तावे संसारं प्रसंख्याननियामपरं स्यात्। तस्माद्वस्तुपरं शास्त्रमिच्छता न प्रसंख्याननियोगगामी कार्य इत्यर्थः। वे
दान्तानां कथाऽरूपत्वात् प्रसंख्याननियोगं विना वस्तुमात्रपरत्वेन प्रामाण्यं न सिध्यतीति। श्रुतत्राहानवेति। अननो
क्तमनेन गृहीतमिति। विशिष्टस्थस्य मंशोन विविद्धितात्यथावेदस्यापोरूषेयत्वापहेरित्यर्थः। तद्धित्वमर्थं श्रुत्वै [हृ०]
यास्व्यायकाकथ्यात तन्त्राह। भमर्थोवाननि। विशिष्टमप्युरुषस्त्रीसंबंधेनात्फदयामाहू साधनत्वज्ञार्थमित्यर्थः। कार्य
निष्ठत्वं मुख्येन परिचर्हितं मिथ्यात्वावदान्तशास्त्रं कार्यपरिमिनुक्तं मत्वा मन्त्रोदयति। पौरुषेयेति। कर्मशास्त्रं नियोगपरमे [ह५]

वं यदि ब्रह्मशास्त्रमपि तदा पुनरुक्तिः स्यात् तत्तयत्र प्रतिपाद्यनियोगस्यैकत्वात् अतो ब्रह्मशास्त्रं न कार्यपरं त्वसंख्यानका
र्यं ब्रह्मशास्त्रपरमित्यर्थः। यद्वा कर्मशास्त्रवद्ब्रह्मशास्त्रस्यापि नियोगपरत्वे पौनरुक्त्यस्य परिहर्तुं शक्यत्वान्नियोगपरत्वं कथं दो
षत्वेनोच्यत इति शोदयति। पौनरुक्त्येति। [illegible] अबद्धिःसाधनो नियोगोत्र प्रतिपाद्यः पूर्वत्र बद्धिःसाधन इत्यर्थो ति
रस्त्रेमित्यर्थः। अथवा वादो तेन नियोगो की कार्य इत्युक्तं तत्राह वादयति। पौनरुक्त्येति। प्रसंख्याननियोगात्तावत्तत्त्वमसीति सई
क्य तादात्म्याद्युत्पन्नज्ञानात्केवलत्वं त्वक्तं स्यात् तदा तत्त्वमसीति न वक्तव्य उपदेशोऽर्थः स्यात् पुनरुक्तिः प्रसंगात् अतत्परिहाराय
शास्त्रात् शेखत्वेन प्रसंख्याननियोगाङ्गीकार्य इत्यर्थः। परिहरति। एकात्म्येति। कर्मब्रह्मशास्त्रविनागार्थमेवं कल्प्यते सविना
गो ब्रह्मशास्त्रे नियोगानस्वरूपगमए वस्यात् तानियोगानरूपगामत्वं तं तद्यायेति नियोगप्राधान्यात् कर्मशास्त्रं स्वनिष्ठनियो
गपरत्वं ब्रह्मशास्त्रे तु स्वात्मा प्रसंख्यानकार्यपरमिति न विनागः स्यात् नापि बद्धिं साधना बद्धिःसाधनत्वेन विनागः। द्वितीयतृ
तीयाध्याय वादकशास्त्रत्वेष्येवं विधिविनागसंत्तवात् तस्मादेकात्म्याक्तेविधिः इत्यर्थो नास्तीति हेत प्रकल्पनं शास्त्रविनागसिद्धि
रित्यर्थः। तृतीयदोषपरिहारस्तु तत्त्वमसीत्य संसदन्यो सबलात्प्रसंख्यानकार्यस्वीकारविडाषापितद्वैकात्म्यस्वीकारे वा क्य
द्वितं विना विधिर्द्यार्थो न घटत इति द्वितप्रपंचः परमार्थो स्वरूपगं तद्यासन संस्तवतीति। एवं तावदेकात्म्यवगतत्रुक्ति प्रसंख्या
नयोरनुपयोगत्व मुक्तो नन्वनुमानगृहीतपि वस्तुनि असंतावनादितिरस्कृत कार्यत्वक्त्या पक्षालोक वस्यादिति तत्राह नार
ति। प्रयोजकज्ञान गृहीतमुक्त्याद्यापक्षयामपि अपराहत ज्ञानविषये तदापक्षानयुक्ताकर्त्रवादरूपमाह इति तत्रातत्प्रमितापौराक्षा
त्रं पापि प्रमाणप्रदानिरपीत्यर्थः। अपराहत प्रमितापौरा द्वायामुदाहरणमाहा। प्रत्यक्षेणेति। प्रत्यक्षाच गातः स्पिष्टकारणज

नर्थकः (right margin, beside lines 4–5)

स्वतः (right margin, beside line 13)

अनपेः (left margin, beside line 14)

मिदमदृष्टकारणकं भवतीति विचार्यादृष्टकारणजन्यावधारणायेत्यपेक्षतिशंकते। अदृष्टेति। यदजन्यावदनस्यादृष्टकारण
जत्वमदृष्टवाक्यप्रमाणवचनेन सिद्धमिति परिहरति। सिद्धमिति। विधिसंबंधविधूयतत्वमादर्नस्यार्थबाधकत्वमध्यस्थादिबाधा
वर्हिताश्चेत्तु न विरोधस्तस्य सर्वप्रमाणबलवत्त्वात् अत्राहाप्रत्यदेति। विधेः सर्वप्रमाणबलवत्त्वे प्रमाणान्तरावाहितिधिपदेऽपि विरो
धतादवस्थादेकात्म्यवाक्यस्याप्यपरस्य सनि विरोधे यजमानः प्रस्तर इतिवृ प्रामाण्यमित्यर्थः। प्रत्यक्षादिनिरासेन प्रम
रवानन्नियोगादृस्तुसिद्धिरिहेत्यत्राह। तन्निषेधादिति। विरोधपरिहारद्वारेण वस्तुसिद्धिः प्रमाणादवस्तुकेत्यर्थः। शा
स्त्रावगतनियोगानपेक्षायां त्ववंतरमाह। कार्येति। शास्त्रं तत्त्वमादिवाक्यं तत्र योर्नियोगब्रह्मणोरावयोर्विभ्रमाण
त्वेन यदि तर्हि साध्यमस्ताववादज्ञाननिवृत्तेर्ज्ञानफलत्वादनर्थको नियोग इत्यर्थः। शास्त्रादवगतवस्तुत्वनपेक्षायां मूढा
दिदृष्टांतः। शास्त्रेणोपदिश्यमानम्यायानर्थकमवाह। तुमर्थमिति। श्रुतिः प्रतन्त्वेव स्वारसिकमामर्थो नैव संविदानेदं व
स्तुप्रतिपाद्यासेत्तावनाविपरीतत्तावनान्निवृत्तमापातदर्शनस्तुत्याद्यतदसत्तावनादिनिरासफलस्तुक्तिरिम दवदं
तीत्यार्थमखंडापारोक्षमीत्र्वात सद्योमुक्तिफलमनुत्तत्वंप्रभूत इत्यर्थः। शास्त्रादवगतेः प्रियुक्तिापदाय्यमत्पदत्रस।
क्तिरत्राह। नेति। ज्ञानस्य स्वार्थनिश्चयेन युक्त्यपेक्षा किंतु प्रतिबंधविगम इत्यर्थः। अर्थनिश्चितिरेव युक्तिफलं किं नस्या
दत्राह। शाब्देति। अनपेक्षत्वं ज्ञानतः तु वावावत् मापेक्षत्वं प्राप्नोतीत्यर्थः। प्रतिबंधविगममात्रे युक्त्यपेक्षायां दृष्टांतमा
ह। नावायारिति। वाक्यार्थेऽपि छादवतत्तिष्ठि प्रकारिणं कथनेनश्वेतालं तस्य विवृतिसाधनत्वज्ञापनाय विधित एवन
मिषेधैः किं तु प्रारोचनाद्वारेत्युपपत्यर्थः। एवमत्रापि ज्ञानस्यात्यन्तो अर्थनिश्चितौ च न युक्त्यपेक्षा अपि तु प्रतिबंधविगमए

२५ ॥वेद्यर्थः॥ अवस्थापेक्षणीयं मुक्तिसारवात्मनो ब्रह्मत्वसिद्धेः। किं शास्त्रेणानाद्वा जायदिति। त्वंपदार्थविवेको मुक्तिफलं ब्रह्म
चतुत्त्वावाक्यफलमित्यर्थः। ब्रह्मात्मनिश्चयो वाक्यस्यापि फलं। आवृत्तिसाध्यत्वादत्वाद्वासिद्धमिति। आत्मज्ञानमस्य स्यमानेनापरोक्षत्वमिति
